# संस्कृत-वार्ता:

दिनाङ्क : 09/03/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री श्रीनरेन्द्रमोदी ब्रूते यत् आयुष्मान भारत योजना, आरोग्य मंदिर योजना माध्यमेन समग्र-राष्ट्रस्य ग्राम्य-क्षेत्रेषु स्वास्थ्यसेवानां विस्तारो विधीयते।
- सम्भाषण-मन्त्रणाभि: कूटनीत्या च पश्चिमैशिया-क्षेत्रे आपीडं न्यूनीकर्तुं भारतेन समाकारितम्। अमेरिका-इज़राइल-देशाभ्यां ईराने आक्रमणानन्तरं दशमे दिनेऽपि पश्चिमैशिया-क्षेत्रे संघर्षः तीव्रतरः।
- पश्चिमैशिया-क्षेत्रस्य स्थिति-विषये चर्चायाः याच्ञा-कारणेन विपक्षस्य तुमुल-कोलाहल-मध्ये लोकसभा श्व: प्रात: एकादश-वादन-पर्यन्तं स्थगिता।
- शिला-तैलेन्धनस्य मूल्यं वर्ष-चतुष्के ऐदम्प्राथम्येन प्रतिबैरलम् शत-डॉलर मूल्यमपि अतिक्रान्तम्, सेंसेक्स इति अंशधन-विपणि-सूचकाङ्कः अपि अपचितः जातः।
- महिला हॉकी क्रीडा-स्पर्धायां भारतम् अद्य सायंकाले हैदराबादे ऐषमः एफ.आई.एच. हॉकी विश्व-चषकीय-समर्हता-आपादन-द्वन्द्वे स्कॉटलैंड-दलं सम्मुखी करिष्यति।

------------------------------------------

प्रधानमन्त्री स्वास्थ्य सेवा –

प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रोदैरयत् यत् विगतेषु कतिपयेषु वर्षेषु भारतस्य स्वास्थ्य-संरचना दृढा संजातास्ति। वित्त-सङ्कल्पनाया: अनन्तरं आयोजितायां वेबिनार इत्याख्यायां सञ्जालीय-सङ्गोष्ठ्यां 'सबका साथ सबका विकास' इति विषये सम्बोधयता मोदिना प्रोदितं यत् जनानाम् आकांक्षाणां सम्पूरणं केवलं चर्चायाः विषयः नास्ति, अपितु एषः विषयः वित्त-सङ्कल्पनाया: मूलाधारः सर्वकारस्य च प्रतिबद्धता अस्ति।

देखभाल-अर्थव्यवस्थायाः विकासोदय-विषये श्रीमोदी सबलम् उक्तवान् यत् सन्निभाल-कर्तॄणां वैश्विक-अभियाच्ञायां वृद्धि-कारणेन अपि राष्ट्रे लक्षाधिकेभ्यः युवजनेभ्यः कौशलाधारितानां जीविकानां नूतना: अवसरा: उत्पन्ना: भविष्यन्ति।

प्रधानमन्त्री उक्तवान् यत् विज्ञान-प्रौद्योगिकी-अभियांत्रिकी-गणित-क्षेत्रेषु महिलानां वृद्धिः वस्तुतः गौरवास्पदं वर्तते। श्री मोदी अतोऽपि न्यगदत् यत् भविष्य-कालिक-प्रौद्योगिकीसु कन्याजनेभ्यः समानावसराणां सुनिश्चयनं कर्तुं शासनम् प्रतिबद्धम् अस्ति।

प्रधानमन्त्री प्रतिपादितवान् यत् भारतं नवोन्मेष-प्रधानं अर्थव्यवसायं प्रति गच्छति। अमुना शैक्षणिक-संस्थाः समाकारिताः यत्ताः निज-परिसरान् केन्द्राणि च उद्योगसहयोगेन अनुसंधानाधारित-शिक्षाया-केन्द्रत्वेन परिवर्तयेयुः, येन छात्राः वास्तविक-विश्वस्य अनुभवं कर्तुं प्रभवेयुः।

------------------------------------------

<u>लोकसभा जयशंकर पश्चिमेशिया -</u>

विदेशमन्त्री डॉ. एस. जयशंकरः सबलं प्रत्यपादयत् यत् पश्चिमैशिया-क्षेत्रे आपीडं न्यूनीकर्तुं मन्त्रणा कूटनीतिश्च समवलम्बनीया। पश्चिम-एशिया-क्षेत्रस्य स्थिति-विषये अवर-सदने प्रदत्ते स्वीये वक्तव्ये डॉ. एस. जयशंकर प्रावोचत् यत् भारत-सर्वकारेण गत-मासस्य विंशे दिनाङ्के तत्रत्य-स्थिति-विषये एकं वक्तव्यं प्रकाशितं, यस्मिन् गभीर-चिन्ता व्यक्तीकृता अस्ति। साकमेव तत्र आपीड-प्रसङ्गे सम्बद्धाः सर्वेSपि पक्षाः संयमं सन्धारयितुम् अध्यर्थिताः सन्ति। तेनोक्तं यत् भारतस्य मतम् अस्ति यत् आपीडस्य न्यूनीकरणार्थं मिथो मन्त्रणायाः कूटनीतेश्च च आश्रयः आश्रयणीयः।

विदेशमन्त्री न्यगादीत् यत् एषः प्रवर्तमानः संघर्षः भारताय अपि विशेष-चिन्तायाः विषयः अस्ति, यतोहि भारतमपि समीपस्थ-क्षेत्रे स्थितम् अस्ति। असौ उदैरयत् यत् विदेश-मन्त्रालयेन स्थितेः परीक्षणार्थं प्रश्नानाम् उत्तरार्थं च विशेषः नियन्त्रण-कक्षः स्थाप्यते। तेन एतदपि प्रोक्तं यत् ह्यस्तन-पर्यन्तं प्रायः सप्त-षष्टि-सहस्र-परिमिताः भारतीय-नागरिकाः देशे प्रत्यागताः सन्ति। अमुना वक्तव्यमिदं विपक्षस्य तुमुल-कोलाहल-मध्ये प्रदत्तं। ध्येमस्ति यद् इमे विपक्ष-जनाः एतस्मिन् प्रकरणे चर्चायाः याचनां कुर्वन्तः अवर्तन्त। डॉ. जयशंकरः राज्यसभायाम् अपि एतदेव वक्तव्यं दत्तवान्।

------------------------------------------

**लोकसभास्थगनम्–**

पश्चिम-एशिया-क्षेत्रस्य आपीड-स्थिति-विषये चर्चा-याचकानां विपक्ष-सदस्यानां तुमुल कोलाहलस्य मध्ये लोकसभा अपराह्ने त्रि-वादनं यावत् स्थगितं जातम्। प्रथमं स्थगनानन्तरम्, यदा सदनं मध्याह्ने द्वादश-वादने पुनः आरब्धम्, तदा विदेशमन्त्री डॉ. एस. जयशंकर: पश्चिम-एशिया-क्षेत्रस्य स्थिति-विषये स्वतः संज्ञानं स्वीकृत्य वक्तव्यं दत्तवान्।

तेन यदैव वक्तव्यं आरब्धं तदैव कांग्रेस्, डी.एम.के., सपा चेत्यादिभि: सहिता: अन्य-विपक्ष-दलानां सदस्याः लिखित-प्रदर्शन-फलकानि गृहीत्वा मध्ये-सदनम् प्रविष्टवन्तः। पीठासीनाधिकारी जगदंबिका पाल: तान् निरदिशत् यत् लिखित-प्रदर्शन-फलकानां प्रदर्शनं सदनस्य नियमावल्या: विरुद्धम् अस्ति।

संसदीय कार्य मन्त्री किरेन रिजिजू: सदनस्य मध्ये विपक्षस्य व्यवहारस्य भृशं भर्त्सनां आलोचनां च कुर्वन् प्रावोचत् यत् अमुना नैजे जीवनकाले एतावान् दायित्वहीन: विपक्ष: कदापि नैव लोकित:। अध्यक्षेण कृतेऽपि अनुरोधे, विपक्ष: निरन्तरं विरोधप्रदर्शनं कृतवान्, येन कारणेन सदनम् श्व: एकादश वादनं यावत् स्थगितं कृतम्।

---

**तैलस्य मूल्यम्-**

अमेरिका-इज़राइल-देशाभ्यां ईराणस्य भूम्यन्तर्वर्ति-आधारिक-प्रक्षेप्यास्त्र-संचना-क्षेत्रे आक्रमणानन्तरं पश्चिमैशिया-क्षेत्रे संघर्षः तीव्रतरः जातः, ईरानेन अपि खाति-क्षेत्रे प्रक्षेप्यास्त्रैः ड्रोनास्त्रैश्च कृतानि आक्रमणानि।

शिला-तैलेन्धनस्य मूल्यं वर्ष-चतुष्के ऐदम्प्राथम्येन प्रतिबैरलम् शत-डॉलर मूल्यमपि अतिक्रान्तम्, सेंसेक्स इति अंशधन-विपणि-सूचकाङ्कः अपि सप्त-शतोत्तर-एक-सहस्र-मिताद् अङ्कादप्यधिकतया अपचितः जातः। निफ्टी समवायः अपि प्रारम्भिके व्यापारे पञ्च-शत-मिताद् अङ्कादपि नीचैः पतितः। इरान्-युद्धेन मध्यपूर्वदेशे उत्पादनं, नौवहनं च बाधितं जायते येन तैलमूल्यानि वर्धमानानि सन्ति ।

------------------------------------------

## महिला हॉकी-

हॉकी-क्रीडायाम्, भारतीय-महिला दलम् अद्य सायंकाले हैदराबादे ऐषम: एफ. आई. एच. हॉकी विश्व चषकीय समर्हणीयतापादन-चक्रस्य पूल् बी मध्ये स्वस्य द्वितीय-स्पर्धायां स्कॉटलैंड् दलं सम्मुखीकरिष्यति। स्पर्धेयं सायं सार्ध सप्त-वादने आरप्स्यते।

ध्यातव्यम् अस्ति ह्यस्तने, भारतीय-दलेन उरुग्वे दलम् शून्यं विरुध्य चतुर्भिः अङ्कै: पराभूतम् ।

------------------------------------------

## लोकसभा – निर्मला सीतारामन्

मुद्रास्फीति-नियन्त्रण-प्रसङ्गे लोकसभायाम् वित्तमन्त्री निर्मला सीतारामन् वर्या अद्य लिखितोत्तर-पत्रे उक्तवती यत् मुद्रास्फीति नियन्त्रणार्थं राजकोषीय-व्यापार-नीतयः प्रशासनिक-उपायाश्च क्रियन्ते।

तया एतदपि अपि निर्दिष्टम् यत् वैश्विक-अपरिष्कृत-तैल-मूल्यवृद्धिः, मध्यम-कालिक-मुद्रास्फीते: विनिमय-दरे उच्चावचता च वैश्विक-याच्ञायां आपूर्ति-स्थितौ, मौद्रिक-नीतिप्रवर्तने च अप्रत्यक्ष-प्रभाव-सहितेषु नैकेषु कारकेषु निर्भरति।

भारतीय-रिजर्व-बैंकस्य मौद्रिक-नीति-प्रतिवेदनम् अनुसृत्य, अपरिष्कृत-तैलेन्धन-मूल्यानि आधारभूत-पूर्वानुमानेभ्य: प्रतिशतं दशाधिकानि सन्ति, येन दैशिक-मूल्ये पूर्ण-प्रभाव: निधीयते, एवं भवति चेत् मुद्रास्फीति: त्रिंशत् आधार-अङ्कै: वर्धितुं शक्नोति।

------------------------------------------

## राज्यसभा – जे.पी. नड्डा प्रतिक्रिया

राज्यसभायाम् सदन-नेता जे.पी. नड्डा वर्य: पश्चिम-एशिया-संघर्ष-विषये श्री जयशंकरस्य वक्तव्यकाले विपक्षस्य व्यवहारं कट्वालोचयन् प्रोक्तवान् यत् तेषां रुचिः मन्त्रणाविधाने नास्ति, अपि तु केवलं अराजकता-प्रसारणे एव ते रुचिमन्त: सन्ति।

तेन एतदपि प्रोक्तं यत् विपक्षस्य रुचिः कदापि स्वस्थ-चर्चायाम् नास्ति, किन्तु विरोधाचरणं कर्तुमेव तेषामभिरुचि: विलोक्यते। श्री नड्डा अतीत-संसत्-सत्रेषु अपि जाता: तादृग् घटना: स्मृतवान्, विशेषत: विगते दिसम्बर-मासे निर्वाचन-परिष्कार-कार्यक्रमे अन्तरिक्ष-कार्यक्रमे च चर्चासमये, यदा विपक्षः सदनात् वॉकआउट् इति बहिष्कारं कृतवान्। अनेन कारणेन सदनं श्व: प्रात: पर्यन्तं स्थगितं जातम्।

---------------------------------------

## माई भारत युवा कनेक्ट:

युव-कार्य-खेल-मन्त्रालयेन अद्य दिल्ल्यां विकसित-भारत-युवा-सम्पर्क-कार्यक्रमस्य द्वितीय-चरणस्य शुभारम्भ: कृतः। एष: उपक्रम: 'मम युवा भारतम्' इत्यस्य माध्यमेन आयोज्यते, यस्य उद्देश्य: विकसित-भारतस्य दृशा सह युवजनानां सहभागितायाः सुदृढीकरणम् अस्ति।

मन्त्रालयेन प्रोक्तं यत् राष्ट्रीय-राजधान्या: पञ्च-त्रिंशदधिकानां महाविद्यालयानां दश-सहस्राधिका: छात्रा: एतस्मिन् कार्यक्रमे भागं भजन्ते।

कार्यक्रमे पंजीकरणं सहभागितां च "माई भारत डिजिटल प्लेटफॉर्म" mybharat.gov.in इत्यस्य माध्यमेन सुगमीकरिष्यते।

---------------------------------------

## रा.स. पर्यावरणसंवादः

राज्यसभया पर्यावरण-वन-जलवायु-परिवर्तन-मन्त्रालयस्य कार्याणां विषये चर्चा कृता। चर्चायाः आरम्भं कुर्वन् भाजपा-पक्षस्य घनश्याम तिवारीः अवदत् यत्, प्राचीनकालात् भारतस्य संस्कृतिः प्रकृत्या पर्यावरणेन च सम्बद्धा अस्तीति। सः वनक्षेत्रस्य वर्धनसहितं पर्यावरणस्य रक्षणार्थं

सर्वकारस्य प्रयत्नानां प्रशंसाम् अकरोत्। वाय. एस. आर. सी. पीति दलस्य अयोध्या रामी रेड्डी अल्ला इत्ययम् अवदत् यत् सर्वकारः जलसुरक्षायाः विषये अवश्यं ध्यानं ददातु इति।

------------------------------------------

## टी-20 क्रिकेटः

अहमदाबाद्-नगरे अन्तिमक्रीडायां न्यूज़ीलैण्ड्-देशम् षण्णवति धावनाङ्कैः पराजय्य, भारतं तृतीयवारं आई. सी. सी. पुरुषाणां टी-20 विश्वकप इत्युपाधिं अभिलेखरूपेण जित्वा इतिहासं लिखितवान्। जस्प्रीत् बुमराह् इत्येषः सर्वाधिकं चतुस्तोभान् संप्राप्य प्लेयर् आफ द मैच इति घोषितः, संजूसैम्संग इत्येषश्च शृंखलोत्तमः क्रीडकः घोषितः।

------------------------------------------

## लो. स. एल. पी. जी. सम्पर्कः

सर्वकारेण अद्यावधि प्रधानमन्त्री-उज्ज्वला-योजनान्तर्गतं निर्धन-परिवाराणां महिलानां कृते सार्धदशकोट्यधिक- एल. पी. जीति वात्यन्धन-सम्पर्कं प्रदत्तमस्ति। योजनेयं षोडशोत्तरद्विशततमवर्षस्य मे-मासे आरब्धा, यस्योद्देश्यं सम्पूर्णे देशे महिलाभ्यः निक्षेपमूल्यरहितं एल पी जीति वात्यन्धन-सम्पर्कं प्रदानाय आसीत्। पेट्रोलियम-प्राकृतिकवात्यन्धन-राज्यमन्त्री सुरेशगोपीत्येषः अद्य राज्यसभायां एकस्य प्रश्नस्य लिखितोत्तरे उक्तवान्। सः अवदत् यत्, अस्याः योजनायाः परिणामेन पारम्परिक-पाकपद्धतीनां परिवर्तनं जातम्, यासु जनाः इतः पूर्वं काष्ठ-गोमयेन्धन-सस्यावशिष्टादीनि घन-इन्धनानि प्रज्वालयन्ति स्म।

।। इति वार्ता: ।।